दिनाङ्क :-09.04.2026

प्रात: - 06:55

विधानसभानिर्वाचनम्

अद्य कतिपय-राज्येषु विधानसभा निर्वाचिनं भवति, यत्र असम-राज्ये षड्विंशत्युत्तरैकशतम्, केरल-राज्ये चत्वारिंशदधिकैकशतं, पुदुचेरी-राज्ये च त्रिंशत् स्थानेभ्यः निर्वाचनार्थम् मतदानं भविष्यति। प्रातः सप्तवादनादारभ्य सायं षड्वादनं यावत् मतदानञ्च अनुवर्तते। स्वतन्त्रं, निष्पक्षं, शान्तियुतं च मतदानं निश्चेतुं सर्वाः व्यवस्थाः सन्ति निभालिताः। असम-राज्ये, राज्यस्य मुख्य-निर्वाचन-अधिकारी अनुराग-गोयलः सर्वेभ्यः योग्यमतदातृभ्यः विधानसभा-निर्वाचने स्वमतदानाय प्रार्थयत्। केरल-राज्ये एकसप्ततिलक्षाधिक-द्विकोटि मतदातारः सन्ति। सार्द्धत्रिसहस्रप्रायः मतदानकेन्द्राणि स्थापितानि सन्ति, येषु चत्वारिंशदधिकद्विसहस्राणि संवेदनशीलानीति मतदानकेन्द्राणि अभिज्ञातानि सन्ति। अद्य यत्र मतदानम् अस्ति सर्वत्र हि मतदानार्थं सार्वजनिक-विरामः घोषितोऽस्ति। पुदुचेरीति केन्द्र-शासित-प्रदेशस्य संस्कृतिं परम्परां च प्रतिबिम्बयन्तः विशेष-विषय-आधारित-मतदानकेन्द्राणि स्थापितानि सन्ति। एतदतिरिच्य, तमिलनाडु-राज्ये एक-चरणीय मतदानाय, पश्चिमबङ्गप्रदेशे च प्रथम-चरणीय मतदानाय नामाङ्कनपत्र निराकरणस्य अद्य अन्तिमः दिवसः अस्ति। मतानां गणना च अग्रिममासस्य चतुर्थदिनाङ्के भविष्यति।

प्रधानमंत्री-पश्चिम बंगाल - भ्रमणम्

भाजपा-पक्षस्य वरिष्ठः नेता, प्रधानमन्त्री च श्रीनरेन्द्रमोदी नैर्वाचनिक- प्रचाराय अद्य पश्चिमवङ्गस्य हल्दिया-नगरं गमिष्यति। सः हल्दिया-नगरे सार्वजनिकसभां सम्बोधयिष्यति, तदनन्तरं आसनसोल्-नगरे, सूरी-नगरे, बीरभूम्-नगरे च जनसभाः सम्बोधयिष्यति। बी. जे. पीति दलाध्यक्षः नितिन नबीनः अद्य प्रातः सिलिगुडीतः माल्दा-नगरं गमिष्यति।

केन्द्रीयमन्त्रिमण्डलेन - निर्णयः

केन्द्रीयमन्त्रिमण्डलेन अस्मिन् वर्षे खरीफेति-शस्येभ्यः फास्फेटिक् पोटाशिक्- इत्येताभ्याम् उर्वरकाभ्यां सार्धैकचत्वारिंशत् कोटि-रूप्यकाणां अनुदानस्य अनुमतिः प्रदत्तास्ति। सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः ह्यः नवदेहल्यां निर्णयानाम् विषये प्रसारमाध्यमान् सम्बोधयन् घोषणैषा प्राकटयत्।

पीयूषः भारतामरिकौ

वाणिज्योद्योग-मन्त्री पीयूष् गोयलः अवदत् यत् भारतम् अमेरिकादेशश्च विश्वस्य सर्वाधिकं परिणामात्मकं आर्थिकसहभागित्वं निर्वहन्तौ संयुक्त- लोकतान्त्रिकमूल्याधारितौ स्तःइति। ह्यः भारत-अमेरिका व्यापार-सौविध्य-फलकस्योद्घाटने सम्बोधयन् श्री गोयलः अवदत् यत् भारत-अमेरिकादेशयोः सहभागित्वम् विशेषम् अस्ति, सहैव हि अनयोः द्वैपाक्षिकव्यापारः द्रुतगत्या वर्धमानः अस्तीति च।

सः अवदत् यत् पोर्टलाख्यस्य अस्य फलकस्य आरम्भः समायोचितं दूरदृष्टियुतञ्च पदोत्थानमस्ति, यद्धि सहभागित्वस्य गहनतां प्रतिबिम्बयति। विदेशसचिवः विक्रम मिस्री, अमेरिकादेशस्थेन भारतीय- राजदूतेन विनय क्वात्रा इत्यनेन सह भारत-अमेरिका-व्यापार-सुविधा-पोर्टल् इति उद्घाटितवान्।

कच्छ-शौर्य-दिवसः

अद्य गुजरातस्य कच्छ-जनपदस्य सीमाक्षेत्रे सरदार-पोस्ट् इत्यत्र शौर्य-दिवसः आचर्यते। अस्मिन् अवसरे, वरिष्ठाः अधिकारिणः, बलस्य कर्मचारिणः च हुतात्मान् गार्ड्-आफ़्-आनर् इति विधया वाद्यवृन्दस्य प्रदर्शनमाध्यमेन च श्रद्धाञ्जलिम् अर्पयन्ति। पञ्चषष्ट्युत्तरैकोनविंशतितमे वर्षे भारत-पाकिस्तान-द्वन्द्वकाले रक्षासेनानां असाधारणयो: साहस-शौर्ययोः च स्मरणार्थं प्रतिवर्षं अप्रैलमासस्य नवमे दिनाङ्के शौर्य-दिवसः आचर्यते।

आई. ए. ई. ए-इण्डियाः

अन्ताराष्ट्रिय-परमाणु-ऊर्जा-संस्थायाः महानिदेशकः राफेल् मारियानो ग्रोसी इत्येषः तमिळुनाडुराज्यस्य कल्पक्कम् इत्यत्र प्रोटोटैप्-फ़ास्ट्-ब्रीडर्-रियाक्टर् इत्यस्य महत्त्वपूर्णसफलतायै भारतस्य प्रशंसाम् अकरोत्। एतत् ऐतिहासिकं स्थानं देशस्य स्वदेशीय-परमाणु-कार्यक्रमे, तस्य दीर्घकालीन-ऊर्जा-सुस्थिरतायाः अन्वेषणे च महत्त्वपूर्णां प्रगतिं सूचयति। स्वस्य आधिकारिक-एक्स्-इति सन्देशफलके श्री ग्रोसीः विकासमिमं भारतस्य प्रभावपूर्ण-प्रगतिः इति वर्णितवान्।

जयशङ्कर-भ्रमणम्

विदेशमन्त्री डा. एस्. जयशङ्करः अद्यारभ्य मारिषस्-देशस्य, संयुक्त-अरब्-अमिरात्-देशस्य च आधिकारिक-यात्रायाम् गमिष्यति। प्रवासस्य प्रथमचरणे डा. जयशङ्करः नवम हिन्दुमहासागरसम्मेलने भागं ग्रहीतुं मारिषस्-देशं गमिष्यति। स्वयात्रायां सः मारिषस्-देशस्य नेतृत्वेन सह मिलित्वा द्वैपाक्षिकसम्बन्धानां समीक्षां करिष्यति।

आई. पी. एल.

आई. पी. एल्. इति क्रिकेट्-क्रीडायां गतरात्रौ दिल्ली-नगरस्य अरुण् जैट्ली-क्रीडाङ्गणे गुजरात्-टैटन्स्-दलम् दिल्ली-कैपिटल्स इति दलं धावनाङ्कैकेन पराजयत।

।।इति वार्ता:।।